मैत्रं मृगशिरो मूला यात्रायामुत्तमाः स्मृताः ॥
भरणी कृत्तिकाश्लेषा विशाखा चोत्तरात्रयम् ।
मघा पशुपतिश्चैव यात्रायां मरणप्रदाः ॥
पूर्व्वे कुवेरे दहने निशाटे
यमे जलेशे पवने महेशे ।
त्वाष्ट्रं नरस्य प्रतिपत्क्रमेण
युग्मं तिथीनां प्रवदन्ति तज्ज्ञाः ।
स्यात् संमुखे यानमसुक्षयाय
पश्चाद्भवेत् सर्व्वशुभाय पुंसाम् ॥
सूर्य्यः शुक्रः कुजो राहुर्मन्दश्चन्द्रो गुरुर्बुधः ।
अग्रतः शोभना यात्रा पृष्ठतो मरणं ध्रुवम् ।
पूर्व्वेणैन्द्रं दक्षिणे यानपादं
रोहिण्यं तत्वार्य्यमाख्याश्च मूलम् ।
कामं यायात् साम्परायेषु कार्य्ये-
ष्वन्यदापि प्रेक्ष्य मूलानि भानि ॥”
तत्र दिक्शूलम् ।
“षष्ठाष्टमी चतुर्थी च नवमी द्वादशी तथा ।
चतुर्द्दशी कुहूश्चान्या यात्रायामशुभप्रदाः ॥
प्रायो जगुः सहजषष्ठदशाय संस्थाः
पापाः शुभाः सविहृजं परिमुच्य खस्थम् ।
सर्व्वगताः शुभफलं जनयन्ति सौम्या-
स्त्यक्तारिसंस्थममरारिगुरुं जिगीषोः ॥
नाकालवर्षविद्युत्स्तनितेष्विष्टं कथञ्चिदपि यानम् ।
आसप्ताहात् दिव्यान्तरीक्षभौमैस्तथोत्पातैः ॥”
तत्र क्रमः ।
“राज्ञां यात्राविधिं वक्ष्ये जिगीषूणां परावनीम् ।
नीराजनाविधिं कृत्वा सैनिकांश्चानयेत्ततः ।
गजानश्वान् रथानन्यानिति यात्राक्रमो मतः ॥”
तत्र नीराजनाविधिः ।
“वर्षान्तेऽभ्युदिते शुक्रे चन्द्रे पूर्णे शुभर्क्षगे ।
अश्वनीराजनं कुर्य्यात् यथोक्तर्क्षेषु सत्तमैः ॥
उदीच्यां प्रस्थिते भानौ संक्रान्त्यां वा शुभे दिने ।
गजनीराजनं कुर्य्यात् महीपालो जिगीषिवान् ॥
वृश्चिकस्थे रवौ कुर्य्यात् पत्तिनीराजनाविधिम् ।
नौकानीराजनं कुर्य्यात् दक्षिणाशां प्रतिष्ठति ॥
अन्येषाञ्चैव यानानां विजयादशमीतिथिम् ।
ध्वजादीनाञ्च सर्व्वेषां शक्रोत्थाने नीराजनम् ॥
छत्रस्य नवदण्डस्य तथा सिंहासनस्य च ।
गृहस्य नगरस्यापि महाविषुवसंक्रमे ॥
आत्मनो युवराजस्य महिष्या मन्त्रिणान्तथा ।
स्वजन्मदिवसे राजा कुर्य्यान्नीराजनाविधिम् ॥
अभिषेकदिनं प्रोक्तमेषां जन्मदिनं मया ॥”
तद्यथा,—
“अश्वानां भास्करो देवो रेवन्तमिति संज्ञया ।
गजानां देवता शक्रः पत्तीनां कालिका मता ॥
नौकानां वरुणो देवो यानानान्तु जयन्तकः ।
अस्त्राणां देवता रामो यमः खड्गस्य पूज्यते ॥
ध्वजानां हनुमान् पूज्यो वृहस्पतिरिति क्रमात् ।
तान् पूजयित्वा विधिवद्देवतान्नीराजयेन्नृपः ॥
द्वादशमहिषैः पुष्टैश्चामरघण्टास्वनादिभूषाढ्यैः ।
छागलैर्महिषद्विगुणैः पुरुषैस्तद्द्विगुणैश्चारुदीपि-
काभिः ॥
अथ वा सहस्रांशुदिने नीराजयेद्राजा ।
द्वादशवाहैः रुचिरैः साङ्गोपाङ्गैरतोऽर्हतश्चोर्य्यैः ॥
तस्मादर्हतो आग्नेर्गजशतनीराजनं सम्भवति ।
छागलशतं वृषभशतं शतञ्च मेषाणाम् ॥
तुरगा दश हृष्टाङ्गा व्याघ्राः पञ्च द्विपश्चैकः ।
भल्लुका हि कुक्कुटाश्चैकैकाः पत्तिलक्षणस्य ॥
नौकाशतकं साङ्गं नवदशकं काञ्चनादिभि-
र्घटितम् ।
बहुशतमपि जन्तूनां नौकानीराजने राज्ञाम् ॥
यदा द्विपदं यानं सर्व्वेषामिष्यते तुरगैः ।
सुदशावत्सरवयितैर्योग्याङ्गैर्योग्यवर्णैश्च ॥
अष्टाभिर्धातुभिः कुर्य्यादस्त्रनीराजनाविधिम् ।
गजाश्वनरनौकाभिर्द्विगुणाभिर्यथोत्तरम् ।
रत्नैर्नानाविधैरस्त्रैर्धातुभिर्वसनैस्तथा ॥
सिंहासनैश्च योग्यैश्च कुर्य्यान्नीराजनाविधिम् ।
गृहनीराजनाप्येवं नरस्याथ निगद्यते ॥
अभिः खरैः शृगालैश्च व्याघ्ररुरैस्तथोष्ट्रैः ।
पुरं नीराजयेद्राजा चिरसम्पत्तिहेतवे ॥
श्वा दशाश्वस्तदर्द्धेन नरश्चैव तदर्द्धतः ।
व्याघ्रादीनां तथैवैकं रत्नं नानाविधन्तथा ॥
अस्त्राणि धातवश्चैव वस्त्राणि च फलानि च ।
वनजाः स्थलजाश्चैव जलजाश्चैव जन्तवः ॥
नवग्रहाश्च सूर्य्याद्याः शैलाः सप्त घटास्तथा ।
योग्यधातुसमुद्भूता नौकाखड्गद्वयन्तथा ॥
निजदेहमितं स्वर्णं रजतं ताम्रमेव वा ।
आत्मनीराजने दद्यादृषिदिष्टं चिरसंस्थितिम् ॥
अस्त्रैर्नानाविधैः कुर्य्याद्युवराजनीराजनम् ।
अलङ्कारैश्च विविधैर्देवीनीराजनं मतम् ॥
मन्त्रिनीराजनं राजा हयेनैव समाचरेत् ॥
अमात्यानां सैनिकानां विप्राणां धनिनान्तथा ।
वस्त्रैर्नीराजनं कुर्य्यादिति भोजस्य सम्मतम् ॥
नीराजनाद्या वस्तूनि न पश्येन्न पुनः स्पृशेत् ।
सप्तकृत्वः परिभ्राम्य कुर्य्यान्नीराजनाविधिम् ॥
न्यसेद्वा पर्वतेषु गहने वा जलेऽपि वा ।
दैवज्ञवैद्यदीनेभ्यः प्रयच्छेद्वा यथायथम् ॥
इति संक्षेपतः प्रोक्तो मया नीराजनाविधिः ।
अनेन विधिना राजा सुचिरं सुखमश्नुते ॥”
तथा हि गर्गः ।
“नीराजना महीन्द्राणां निघ्नन्ति विपदोऽखिलाः ।
सैव सन्नहनं राज्ञां कञ्चुकेनेव संयतः ॥
नीराजनान्वितानां न भयं विद्यते क्वचित् ।
नीराजनाविहीनानां नश्येयुः सर्व्वसम्पदः ॥”
तथा च वात्स्यः ।
“ये भूमिपालाः प्रतिवत्सरान्ते
कुर्व्वन्ति नीराजनकर्म्म सम्यक् ।
तेषां न लक्ष्मीः क्षयतामुपैति
धात्र्याप्यलक्ष्मीः करणेव तेषाम् ॥
एवं नीराजनं कृत्वा राजा प्रस्थानमाचरेत् ॥”
इति नीराजनाविधिः ॥ * ॥
अथ यात्रा ।
“गुणातिशयसम्पन्नः शत्रुं यायाज्जिगीषया ।
यदि पश्चात् प्रकोपो न यदि राष्ट्रे न कण्टकाः ॥
संधायान्यत्र यायाद्वा पार्ष्णिग्राहेण शत्रुणा ॥
राज्ञामुलूको विनिहन्ति काकान्
काकोऽप्युलूकान् रजनीव्यपाये ।
इति स्वकालं समुदीक्ष्य यायात
काले फलन्तीह समीहितानि ॥
प्रबलव्यसनोपेतं दुर्भिक्षादिप्रपीड़ितम् ।
सम्भूतान्तरकोपेतं न यायात् पृथिवीपतिः ॥
निजदैवानुकूल्ये हि प्रातिकूल्ये परस्य च ।
यायान्नृपो यतो दैवं बलमेतत् परं मतम् ॥”
अन्यत्र तु ।
“निरातङ्के निरुत्पाते निरुद्विग्ने निरामये ।
विपक्षे जयमिच्छन्ति राजानो विजिगीषवः ॥”
इति युक्तिकल्पतरुः ॥
युद्धयात्रायाममङ्गलदर्शनं यथा,—
“तस्य निर्गच्छतो गेहात् श्वानोऽस्थि मुखतो-
ऽभवत् ।
ध्वजे ररोह कापोतः शिवा श्यामा च
दक्षिणा ॥
पिङ्गला चञ्चुगोधा च शूकरी केवली तथा ।
गजवानरसेनाजशिखिच्छिकाश्च वामतः ॥
पथं विभिन्दते सर्पः कुम्भोदकं व्यशीर्य्यत ।
ररास वानरो ऋक्षो मार्जारो ह्यतिभैरवम् ॥
तैलतक्रहस्तकेशयुक्ताभ्यक्तादिदर्शनम् ।
वान्तोन्मत्तजड़मूकक्षुत्क्षामनक्रन्दं रवम् ॥
तुषकार्पासलवणानां निन्दितानाञ्च दर्शनम् ।
रक्ताम्बरधरो मुण्डः पक्वामिषं तथा वसा ॥
ललाटं शक्रजश्चाप उल्कापातध्वजारुणाः ।
दिशां दाहमहीकम्पाः सरजः कलुषं नभः ॥
निस्तेजस्तपते भानुर्नद्यः प्रतिमुखावहाः ।
उष्णोदकं महाकूपं दरणं दीर्घिकासु च ॥
अकालविकृतिः पुष्पफलानामन्वभूत्तदा ।
शीत उष्णविपर्य्यासा मेघनादाश्च दारुणाः ॥
आरण्यसत्त्वा ग्रामेषु ग्रामजारण्यवासिनः ।
क्रोष्टृसर्पसमूहाश्च शशश्वानः पिपीलिकाः ॥
काकाणां महती सेना मृगाणाञ्च तथैव च ।
एते च पुरप्राकारे निपतन्त्युत्पतन्ति च ॥
दुर्गन्धः शार्करो वायुर्दीना योधा हतप्रभाः ।
शकृन्मूत्राश्रुपातानि गजा अश्वाः प्रचक्रिरे ।
ध्वजच्छत्रपताकानां स्फुटनं दण्डभिन्दनम् ।
कलङ्कमसि चक्रे च हता दुन्दुभिरेव च ॥
व्यातलाकूटनञ्चापि नाराचानाञ्च कुञ्चता ।
गदानां मुद्गराणाञ्च शीर्णता ह्यनुभिन्दता ॥
शुष्कप्ररोहणञ्चार्कसार्द्रपातस्तथैव च ।
प्रतिमारुदितं स्वेदो मृतकानाञ्च जल्पनम् ॥
गवां रासभमारोहः क्षीणाश्च वकपतता ।
क्रोशति अविच्छागादि ह्यजावि शिशुशोभनम् ।
बालानां घातनं युद्धे निस्त्रिंशाः सकलाः प्रजाः ।
मक्षिकादंशमण्डूकबहुगोनासदर्शनम् ॥
निस्तेजा न वहेद्वह्निः सधूमः स्फुटते मुहुः ॥
एवंविधान् तथोत्पातान् दृष्टान् घोरेण वासव ।
पप्रच्छ नारदं सोऽथ किमेतद्विकृतं द्विज ! ॥”
इत्यादि देवव्रतारे घोरवधाध्यायः ॥